ધીતપોબલિનાં ચાહમ્ । ધીસ્તપો બલમેવ ચ । ત્રિવિધેષુ વિકારેષુ । મદુત્પન્નેષ્યહં સ્થિતઃ ॥ ૮॥

યો મે તત્ત્વં વિજાનાતિ । મોહં ત્યજતિ સોઽખિલમ્ । અનેકૃર્જન્મભિક્ષેવમ્ । જ્ઞાત્વા માં મુચ્યતે તતઃ ॥ ૯॥

અન્ને નાનાવિધાન્ દેવાન્ । ભજન્તે તાન્ વજન્તિ તે યથા યથા મતિં કૃત્વા । ભજતે માં જનોખિલઃ ॥ ૧૦॥

તથા તથાસ્ય તં ભાવમ્ । પ્રયામ્યહમેવ તમ્ । અહં સર્વં વિજાનામિ । માં ન કશ્ચિત્ વિબુધ્યતે ॥ ૧૧॥

યઃ શ◌ૃત્વા ત્યજતિ પ્રાણમ્ । અન્તે માં શ્રદ્ધયાન્વિતઃ સ યાત્યપુનરાવૃત્તિમ્ । પ્રસાદાન્મમ ભૂભુજ! ॥ ૧૨॥

૯૯૯??

અહિંસા પ્રથમં પુષ્પમ્ । પુષ્પમિન્દ્રિય નિગ્રહઃ । સર્વભૂતદયા પુષ્પં ક્ષમાપુષ્પં વિશિષ્યતે ॥ ૧૮॥

શમઃ પુષ્પં તપઃ પુષ્પમ્ । ધ્યાનં પુષ્પં તથૈવ ચ । સત્યં ચૈવાષ્ટમં પુષ્પમ્ । એતસ્તુતિ દેવતામ્ ॥ ૧૯॥

શ્રવણં કીર્તનં દેવ્યાઃ । સ્મરણં પાદસેવનમ્ । અર્ચનં વન્દનં દાસ્યમ્ । સખ્યમાત્મનિવેદનમ્ ॥ ૨૦॥

ઇતિ પુંસાર્ચિતા દેવ્યાઃ । ભક્તિસ્તુ નવલક્ષણા । ક્રિયતે ભગવત્યર્થિ । તન્નન્નેમ્ભીષ્ટમુત્તમમ્ ॥ ૨૧॥

ન્યાસં ચ મૂલમન્ત્રસ્ય । તતો ધ્યાત્વા જપેન્મનસિ । સ્થિરચિત્તો જપેન્મન્ત્રમ્ । યથા ગુરુમુખાગતમ્ ॥ ૨૨॥

જપં નિવેદ્ય દેવાય । શ્રુત્વા સ્કોરનેકધા । એવં માં ય ઉપાસીત । સ લભેત્ મોક્ષમવ્યયમ્ ॥ ૨૩॥

કુસુમાર્ય ઉવાચઃ અનન્યભાવાસ્કાં સમ્યક્ । મૂર્તિમન્તમુપાસતે । યોત્પરં પરમવ્યક્તા । તયોઃકસ્તે મતોऽધિકઃ ॥ ૨૪॥

દેવ્યવાચઃ યો માં મૂર્તિધરં ભક્તા । મધ્યક્તઃ પરિષેવતે । સ મે માન્નોऽનન્ય ભક્તઃ । નિયુજ્ય હૃદયં મયિ ॥ ૨૫॥

ખગણં સ્વવશં કૃત્વા । અખિલભૂત હિતાર્થકૃત્ । ધૈયમક્ષર મવ્યક્તમ્ । સર્વગં કૂટગં સ્થિરમ્ ॥ ૨૬॥

અવ્યક્ટોપાસના દુઃખમ્ । અધિકં તેન લભ્યતે । વ્યક્તખ્યોપાસનાત્ સાધ્યમ્ । તદેવાવ્યક્ત ભક્તિતઃ ॥ ૨૭॥

ભક્તિશ્ચવાદરશ્ચાત્ર । કારણં પરમં મતમ્ । સર્વેષાં વિદુષાં શ્રેષ્ઠો । કિઞ્ચિતજ્યોऽપિ ભક્તિમાન્ ॥ ૨૮॥

મહાપણ્ડિતરિગિન્તલૂ એનૂ તિળિયદ પામરનુ ભક્તિ તત્પરનાદરે મત્તૂ શ્રેષ્ઠને શુકાદ્યાંસનકાદ્યાત્વ । પુરા મુક્તા હિ ભક્તિતઃ । ભવ મામનુપ્રાપ્તાઃ । નારદાદ્યાક્ટિરાયુષઃ ॥ ૨૯॥

અતો ભક્તા મયિ મનો । નિધેહિ બુદ્ધિમેવ ચ । ભક્તા માં યજસ્વ રાજન્! । તતો મામેવ યાસ્યસિ ॥ ૩૦॥

મદ્ક્કાન્નોજયેત્ પ્રીત્યા । તથા ચૈવ સુવાસિની । કુમારીર્વટકાંશ્ચાપિ । મદ્બુદ્ધા મદ્યતાન્તર ॥ ૩૧॥

માર્ગાસ્તયો મે વિખ્યાતા । મોક્ષપ્રાપ્ વિશાંવર! કર્મયોગો જ્ઞાનયોગો । ભક્તિયોગશ્ચ ભૂમિપ !॥ ૩૨॥

તયાણામપ્લયં યોગ્યઃ । કર્તુ૦ શક્ટોऽસ્તિ સર્વદા । સુલભત્વાન્માનસત્વાત્ । કાયચિત્તાદ્યપીડનાત્ ॥ ૩૩॥

ગુણભેદાન્નનુષ્યાણામ્ । સા ભક્તિસ્તિવિધાઃ મતાઃ । પરપીડાં સમુદ્દિશ્ય । દમ્ભં કૃત્યા પુરસ્પરમ્ । માત્પર્ય ક્રોધયુક્રો યઃ । તસ્ય ભક્તિસ્તુ તામસી ॥ ૩૪॥

પરપીડાદિરહિતઃ । સ્વકલ્યાણાર્થમેવ ચ નિત્યં સકામો હૃદયે । યશોર્થિ ભોગલોલુપઃ । તત્તત્પલ સમાપૈર્માંમુપાસ્સેસ્તિ ભક્તિતઃ ॥ ૩૫॥

ભેદબુદ્ધા તુ માં સ્વસ્થાદન્યાં જાનાતિ પામરઃ । તસ્ય ભક્તિસ્સમાખ્યાતા વિશાધિપ તુ રાજસી ॥ ૩૬॥

પરમેશાર્પણં કર્મ । પાપસંક્ષાળનાય ચ । વેદોક્ત ત્વાદવશ્યં તત્ । કર્તવ્યં તુ મયાનિશમ્ ॥ ૩૭॥

ઇતિ નિશ્ચિત બુદ્ધિસ્તુ । નિર્ભેદબુદ્ધિમાશ્રિતઃ । કરોતિ પ્રીતયે કર્મભક્તિસ્સા નૃપ સાત્વિકી ॥ ૩૮॥

પૂજયેન્માં પ્રયત્નન । તત્તદિષ્ટફલં લભેત્ । મદ્ક્કો મત્પરસ્પર્વ । સઙ્ગહીનો મદર્ચકૃત્ । નિદ્રોધ સર્વભૂતેષુ । સમો મામેતિ ભૂભુજ ! ॥ ૩૯॥

ક્રોધરહિતનુ સર્વભૂતગળલ્લિ સમભાવદિન્દિરુવવનુ નન્નન્નુ સેરબલ્લનુ રાજેન્દ્રને! મત્પરા યે મદાસક્ત ચિત્તા ભક્તવરા મતાઃ । પ્રતિજાને ભવાદસ્માત્ । ઉદ્ધરામ્યચિરેણ તુ ॥ ૪૦॥

ૐ તત્સદિતિ શ્રીવાસવિદેવીગીતાયાં બ્રહ્મવિદ્યાયાં યોગશાસ્ત્ર ભક્તિયોગોનામ નવમોऽધ્યાયઃ ।

## ૧૦

અથ દશમોऽધ્યાયઃ ।

૯૯૯??

એતજ્ઞાનથ સદસદ્વરેણ્યમ્ । પરં વિજ્ઞાનાદ્‌રિષ્ઠં પજાનામ્ ॥ ૩॥

યદર્ચિતમધ્યદણુભ્રૂણુચ । યસ્મિન્ લોકા નિહિતાલોકિનશ્ચ

૯૯૯??

તદેતદક્ષરં બ્રહ્મ । સપ્રાણસ્તદસ્તુ વાનઃ । તદેતત્સત્યમમૃતમ્ । તથૈદ્વવ્યં વિદ્ધિ હે નૃપ ! ૫॥

પ્રણવો ધનુશ્યરો હ્યાત્મા । બ્રહ્મ તલ્લક્ષમુચ્યતે ॥

અપ્રમત્તેન ભેદ્વ્યમ્ । શરવત્તન્મયો ભવેત્ ॥ ૬॥

યસ્મિન્ દૈશ્ચ પૃથિવી ચાન્તરિક્ષં ઓતં મનસ્સહ પ્રાશ્ચ સર્વૈઃ ॥ ૭॥

તમેવૈકં જાનથ આત્માનમન્યા વાચો વિમુઞ્ચથામૃતસ્યૈષ હેતુઃ ॥ ૮॥

ઓમિત્યેવં ધ્યાયેતાત્માનમ્ । સ્વસ્તિવઃ પારાય તમસઃ પરસ્તાત્ । દિવ્ય બ્રહ્મપુરેવામ્મિ । આત્મનિ સંપ્રતિષ્ઠિતઃ ॥ ૯॥

હિરણ્મયે પરે કોશે । વિરજં બ્રહ્મનિષ્કળમ્ । તચ્છુભં જ્યોતિષાં જ્યોતિઃ । તદ્યદાત્મવિદો વિદુઃ ॥ ૧૦॥

ન તત્ર સૂર્યોભાતિ ન ચન્દ્ર તારકમ્ । નેમા વિદ્યુતો ભાન્તિ કુતોऽયમગ્નિ; તમેવ ભાન્તમનુભાતિ સર્વ૦ તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૧૧॥

બ્રહ્મૈવેદમમૃતં પુરસ્તાહ્મ પશ્યાદૃષ્ટ દક્ષિણતશ્ટોત્તરેણ અધક્ટોર્વ્વં ચ પ્રકૃતમ્ । બ્રહ્મૈવેદં વિશ્વં વરિષ્ઠમ્ ॥ ૧૨॥

એતાદૃગનુભવો યસ્ય । સકૃતાર્થો નરોત્તમ ! બ્રહ્મભૂતઃ પ્રસન્નાત્મા । ન શોચતિ ન કાઙ્ક્ષતિ ॥ ૧૩॥

દ્વિતીયા ભયં રાજન્! । તદભાવાદિ ચેતિ ન । સ તદ્વિયોગો મેષ્યસ્તિ । મયોગોऽપિ તસ્ય ન ॥ ૧૪॥

અહમેવ સ સોષં વૈ । નિશ્ચિતં વિદ્દિ સન્મતિઃ । મદ્દર્શનં તુ તત્ર સ્યાત્ । યત્ર જ્ઞાની સ્થિતો મનુ ॥ ૧૫॥

ૐ ક્રીં શ્રીં નાહં તીર્થ ન કૈલાસે । વૈકુણ્ઠ વાસ કુત્રચિત્ । વસામિ કિં તુ મદ્દ્નાની । હૃદયામ્બુજ મધ્યમે ॥ ૧૬॥

મત્તૂજાકોટિ ફલદમ્ । સકૃન્માનિનોર્ચનમ્ । કુલં પવિત્રં તસ્યાસ્તિ । જનની કૃતકૃત્યકા ॥ ૧૭॥

યોગશાસ્ત્ર બ્રહ્મવિદ્ બ્રહ્મતત્ત્વ સમૈક્યતાસાધનયોગોનામ દશમોऽધ્યાયઃ ।

## ૧૧

શ્રી વાસવિદેવીગીતા અથ એકાદશોઽધ્યાયઃ ।

યુગધર્મ પ્રબોધયોગઃ દેવ્યવાચઃ મહાદ્ભુતં વિશિષ્ટં ચ । વિષયં શ્ૃણુ ભૂપતે! । મમ દિવ્યસમ્ભૂતિસ્ય । રહસ્યં તુ કલૌ યુગે દેવિ ॥ ૧॥

અહમેવ પરમ્બ્રહ્મ । મહારુદ્રોહ મેવ ચ । અહમેવ જગત્સર્વમ્ । સ્થાવરં જઙ્ગમં ચ યત્ ॥ ૨॥

અધર્મ સઞ્ચયો ધર્મા । સઞ્ચયો હિ યદા ભવેત્ । સાધૂન્ સંરક્ષિતું દુષ્ટાન્ । તાડિતું સમ્ભવામ્યહમ્ ॥ ૩॥

ઉચ્ચિદ્યાધર્મ નિચયં ધર્મ સંસ્થાપયામિ ચ । હન્નિ દુષ્ટાંશ્ચ દૈત્યાંશ્ચ । નાના લીલાકરો મુદા ॥ ૪॥

વર્ણાશ્રમાન્ મુનીન્ સાધૂન્ । પાલયે બહુરૂપદૃક્ । એવં યો વે સમ્ભૂતમ્ । મમ દિવ્યાં યુગે યુગે ॥ ૫॥

ઘોરે કલિયુગે પ્રાપ્તાઃ । હિંસાધર્મ નિરઙ્કુશાઃ । ત્રિમૂર્તયોઽથાત્યન્તમ્ । વ્યાકુલાઃ કર્તવ્યમૂઢયા । માં પરાશક્તિં ચ સંપ્રાર્થ્ય । એવં વિજ્ઞાપિતાસ્તદા ॥ ૬॥

હે દેવિ! ભક્તવરદે । સૃષ્ટિસ્થિતિલયકારિણિ । અમ્બિકે! દૌષ્ટનાશાર્થમ્ । શિષ્ટસંરક્ષણાય ચ । ઊદાજ્ઞયા વયં ભૂમ્ । અવતારામો યુગે યુગે ॥ ૭॥

ઘોરેસિન્ કલિયુગે । ભ્રષ્ટા; અદ્ય નરાઃખભવન્ અધર્મ નિરતાસ્પર્વે । રાજાનશ્ચ નિરઙ્કુશાઃ ॥ ૮॥

તે સર્વે યદિ હન્નેયુર્ । ભવેદ્ધાશ્રી સ્મશાનવત્ । અતઃ કર્તવ્યમૂઢાનામ્ । ઉપદેશય સત્પથમ્ ॥ ૯॥

એવં ત્રિમૂર્તિભિઃ પૃષ્યા । અહમુવાચહ યથા । વિચારં પરિત્યજન્તો । ભવન્તુ લોકપાલકાઃ ॥ ૧૦॥

ભવદ્દિર્દુષ્ટસંહાર । ણે હિંસાવિધિરાશ્રિતા । યુગેન્ અનુસરણીયો । અહિંસા માર્ગમેવ ચ ॥ ૧૧॥

સહૃદયં સૌમનસ્યમ્ । વિદ્વેષં કરોમિ વઃ । અન્નો અન્યમભિહર્યત । વત્સં જાતમિવા ગૌ ॥ ૧૨॥

ઉતદેવા અવહિતમ્ । દેવા ઉન્ન યથા પુનઃ । ઉતાગશ્યકૃષં દેવા । દેવા જીવ યથા પુનઃ ॥ ૧૩॥

યસ્તુ સર્વાણિ ભૂતાનિ । આત્મવાનુપશ્યતિ । સર્વભૂતેષુ ચાત્માનમ્ । તતો ન વિચિકિત્સતિ ॥ ૧૪॥

અહિંસા પરમો ધર્મઃ । સર્વપ્રાણભતાં સ્ટતઃ । તસ્માત્ પ્રાણભ્યતઃ સર્વાન્ । અહિંસ્કાદ્ જ્ઞાનવાન્ ક્વચિત્ ॥ ૧૫॥

ન વેદૈર્ન ચ દાનૈશ્ચ । ન તપોભિર્ન ચાલ્વરૈઃ । કદાચિત્ સતિં યાન્તિ । પુરુષાઃ પ્રાણિહિંસકાઃ ॥ ૧૬॥

પુરામિ મયા યથા ચોક્તમ્ । મદ્દક્તાય સમાધિયે । તત્પકારેણૈવાહમ્ । ઉદ્ભવિષ્ય કલ્ યુગે ॥ ૧૭॥

સમાધિસ્તુ ઋષિસ્તાવદ્ । ઇદાનીં કુસુમનામકઃ । માં પૂજયન્નેવાસ્તિ । પૃથિવીં પાલયસ્સદા ॥ ૧૮॥

તત્તુતાહં ભવેયં ચ । વાસવી નામિકા ભુવિ । તતોહં નૂતૃવિધિના । ચાશિંસા માર્ગરૂપિણા ॥ ૧૯॥

ત્યાગાધારિણા તેન । કરિષ્ટે નિષ્કલુષં જગત્ । એષ્ટેવાહિંસા વિધઃ । અનુસરણીયા કિ યુગે । એતદ્દિન્ન વિધિસ્તાવત્ । સર્વથાત્રાસમઞ્જસઃ ॥ ૨૦॥

૯૯૯??

ૐ ક્રીં શ્રીં અહમેવ ગણનાથઃ । જાતઃ પઞ્ચવિધાઃ પુરા । અજ્ઞાનાત્ માં ન જાનન્તિ । જગત્કારણ કારણમ્ ॥ ૨૫॥

મત્તોસ્દ્ધિરાષો ધરણિ । મત્તઃ આકાશમારુત । બ્રહ્મવિષ્ણુશ્ચરુદ્રશ્ચ । લોકપાલાઃ દિશોદશ ॥ ૨૬॥

વસવો મુનયો ગાવો । મનવઃ પશવોઽપિ ચ । સરિતસ્સાગરાઃ યક્ષાઃ । વૃક્ષાઃ પક્ષિગણા ઇવ ॥ ૨૭॥

યચ્ચકિઞ્ચિત્ ક્વચિદ્વસ્તુ । દૃશ્યતે શૂયતેઽપિ વા । અન્તર્બહિશ્ચ તત્સર્વમ્ । વ્યાપ્યાહં સર્વદા સ્થિતા ॥ ૨૮॥

તથૈકવિંશતિ સ્વર્ગાઃ । નાગાસ્પષ્ઠવનાનિ ચ મનુષ્યાઃ પર્વતાસ્સાધ્યાઃ । સિદ્ધા રક્ષેગણાસ્તથા ॥ ૨૯॥

ૐ તત્સદિતિ શ્રીવાસવિદેવીગીતાયાં બ્રહ્મવિદ્યાયાં યોગશાસ્ત્ર યુગધર્મપ્રબોધયોગોનામ એકાદશોઽધ્યાયઃ ।

## ૧૨

શ્રી વાસવિદેવીગીતા અથ દ્વાદશોઽધ્યાયઃ ।

દેવીવિશ્વરૂપ સન્દર્શનયોગઃ કુસુમાર્ય ઉવાચઃ યથા વદસિ દેવેશિ । સમષ્ટાવપુદમ્ । તથૈવ દ્રષ્ટુમિચ્છામિ । યદિ દેવિ કૃપામયિ! ॥ ૧॥

કુસુમાર્યનિન્તેન્દનુઃ અથ ભક્તમતં જ્ઞાત્વા । કન્યકા ભક્તકામદા । અદર્શય વિરાડ્રૂપમ્ । ભક્તકામપ્રચૂરિણી ॥ ૨॥

અપશ્યંસે મહાદેવ્યા । વિરાડૂપં પરાત્વરમ્ । દૈર્મસ્તકં ભવેદ્યસ્ય । ચન્દ્રર્સૂ ચ ચક્ષસી ॥ ૩॥

દિશક્કોતે વચો વેદાઃ । પ્રાણો વાયુ પ્રકીર્તિતઃ । વિશ્વં હૃદયમિત્યાહુઃ । પૃથિવી જઘનં સ્મૃતમ્ ॥ ૪॥

નભસ્સલં નાભિસરો । જ્યોતિશ્ચક્રમુલમ્ । મહર્લોકસ્તુ ગ્રીવા સ્યાદ્ । જનોલોકં મુખં સ્ટતમ્ ॥ ૫॥

અપોલોકો લલાટસ્તુ । સત્યલોકાદ્ અધઃસ્થિતઃ । ઇન્દ્રાદયો બાહવસ્સુ શબ્દસ્તોત્રં મહેશિતુઃ ॥ ૬॥

નાસત્યદ નાને સ્કો । ગન્ધો ફ્યાણં મહેશિતુઃ । મુખમગ્નિ સ્પમાખ્યાતો । દિવારાવ ચક્ષુણી ॥ ૭॥

બ્રહ્મસ્થાનં ભૂવિજૃમ્ભોઽટ્ વ્યાપસ્તાલુઃ પ્રકીર્તિતાઃ । રસો જિહ્વા સમાખ્યાતા । યમો દંષ્ટાઃ પ્રકીર્તિતાઃ ॥ ૮॥

દન્તાસોહકલા યસ્ય । હાસો માયા પ્રકીર્તિતા । સર્ગપાઙ્ગ મોક્ષસ્યાદ્ । વીડોર્થૈષ્ટો મહેશિતુઃ ॥ ૯॥

મેલિન તુટિયાયિતો લોભસ્યાદધરોષ્ટોઽસ્યા । દધર્મમાર્ગસ્તુ પૃષ્ટભૂઃ । પ્રજાપતિશ્ચ મેઢ્ર સ્યાત્ । યસ્સષ્ટા જગતીતલે ॥ ૧૦॥

અધો અઙ્ગવાચિતો કુક્ષિસ્પમુદ્રાઃ ગિરયોઽ સ્ટેનિ દેવ્યા મહેશિતુઃ । નદ્યો નાઙ્કસ્સમાખ્યાતા । વૃક્ષાઃ કેશાઃ પ્રકીર્તિતાઃ ॥ ૧૧॥

કૌમાર યૌવ્વન જરા । વયોઽસ્યા ગતિરુત્તમા । વલાહકાસ્તુ કેશાસ્સુઃ । સન્ધ્યે તે વાસવિ વિભો ॥ ૧૨॥

રાજન્ શ્રી જગદમ્બાયા શ઼ૃન્દ્રમાસ્તુ મનસ્થતઃ । વિજ્ઞાનશક્તિસ્તુ હરિઃ । રુદ્રોન્તઃકરણં તમ્ ॥ ૧૩॥

અશ્વાદિ જાતયસ્સર્વા । શ્રોણિદેશે સ્થિતા વિભોઃ । અતલાદિ મહાલોકાઃ । કટ્યધોભાગતાં ગતાઃ ॥ ૧૪॥

એતેદૃશં મહારૂપમ્ । દદર્શ વૈશ્યપુઙ્ગવઃ । જ્વાલામાલા સહસ્રાઽ્યમ્ । લેલિહાસં ચ જિહ્વયા ॥ ૧૫॥

દંષ્ટાકટકટારાવમ્ । વમન્તં વમક્ષિભિઃ । નાનાયુધધરં વીરમ્ । સર્વપ્રાગ્યૂશનં ચ યત્ ॥ ૧૬॥

સહસ્ર શીર્ષનયનમ્ । સહસ્રચરણં તથા । કોટિસૂર્ય પ્રકાશમ્ । વિદ્યુત્કટિ સમપ્રભમ્ ॥ ૧૭॥

ભયઙ્કરં મહાઘોરમ્ । હૃદકોસ્તાસકારકમ્ । સન્દૃષ્ટાતુ કુસુમ્ભાર્યે । હાહાકારં ચ ચક્રિરે ॥ ૧૮॥

વિકમ્પમાન હૃદયઃ । મૂર્છામાપુર્દુરત્યયમ્ । સ્ટરણં ચ ગતં તેષામ્ । જગદામ્બેય મિત્યપિ ॥ ૧૯॥

અથ તે ધૈર્યમાલમ્બ્ય । લજ્ઞા ચ સ્મતિમુત્તમમ્ । પ્રેમાશ્રુપૂર્ણનયનઃ । રુદ્રકણ્ઠસ્તુ ભૂપતિઃ । બાષ્પગદ્દયા વાચા । સ્તોતું સમુપચક્તિરે ॥ ૨૦॥

કુસુમશ્રેષ્ઠિ ઉવાચઃ અપરાધં ક્ષમસ્વામ્બ । પાહિ દીનાં સત્તોદ્વે । કોપં સંહાર દેવેશિ । સભયા રૂપદર્શનાત્ કા તે સ્તુતિઃ પ્રકર્તવ્યા । પામરૈર્નૃપતીરિહ ॥ ૨૧॥

નમસ્તે ભુવનેશાનિ । નમસ્તે પણવાતૃકે । સર્વવેદાન્ત સંસિદ્દે । નમો હ્રીઙ્કારમૂર્તયે ॥ ૨૨॥

યસ્માદગ્નિ સમુત્પન્નો । યસ્માત્તૂર્યશ્ચચન્દ્રમાઃ । યસ્કાદોષધયસ્સર્વાઃ । તસ્ય સર્વાત્મને નમઃ ॥ ૨૩॥

યસ્કાચ્ચ દેવા સમ્ભૂતાઃ । સાધ્યાઃ પક્ષિણશ્ચેવ ચ । પશવશ્ચ મનુષ્યાશ્ચ । તસ્યે સર્વાત્મને નમઃ ॥ ૨૪॥

દેવીં વાચમજનયન્ત દેવા । સ્ના વિશ્વરૂપાઃ પશવો વદન્તિ । સા નો મન્દ્રેષ મૂર્જન્દુહાના । ધેનુર્વાગસ્કાનુપસુપ્પતૈતુ ॥ ૨૫॥

નમો વિરાટ્રૂપિ । નમો સૂત્રાત્યમૂર્તયે । નમો અવ્યાકૃતરૂપિ । નમઃ શ્રી બ્રહ્મમૂર્તયે ॥ ૨૬॥

નમસ્તત્વદ લક્ષાર્થા૦। ચિદેકરસરૂપિણીમ્ । અખણ્ડાનન્દરૂપાં તામ્ । વેદતાત્પર્ય ભૂમિકામ્ ॥ ૨૭॥

પઞ્ચકોશાતિરિક્તાં તામ્ । અવસ્થાત્રય સાક્ષિણીમ્ । નમસ્ટમ્પદ લક્ષાર્થા૦। પ્રત્યગાત્મ સ્વરૂપિણીમ્ ॥ ૨૮॥

પ્રાણાપાન્ વીહિયવ । તપશ્રદ્દા ઋતં તથા । બ્રહ્મચર્ય૦ વિધિશૈવ । યસ્માત્તસ્યે નમો નમઃ ॥ ૨૯॥

યત્તમુદ્રા ગિરયઃ । સિન્ધવઃ પ્રચરન્તિ ચ । યસ્માદોષધયઃ સર્વા । રસાસ્તસ્યે નમો નમઃ ॥ ૩૦॥

યસ્કાદ્ યજ્ઞસમુદ્યતો । દીક્ષા યૂપશ્ચદક્ષિણાઃ । ઋચો યજૂષિ સામાનિ । તસ્યે સર્વાત્મને નમઃ ॥ ૩૧॥

ઉપસંહર દેવેશિ । રૂપમેતદ્ અલૌકિકમ્ । તદેવ દર્શયાસ્માકં રૂપં સુન્દર સુન્દરમ્ ॥ ૩૨॥

ઇતિ ભીતાત્મકઃ દૃષ્ટા । જગદમ્બા કૃપાર્ણવા । સઙ્કૃત્ય રૂપં ઘોરમ્ । તદ્દર્શયામાસ સુન્દરમ્ ॥ ૩૩॥

પાશાઙ્કુશ વરાભીતિ ધરં સર્વાઙ્ગકોમલમ્ । કરુણાપૂર્ણ નયનમ્ । મન્દસ્મિત મુખામ્બુજમ્ ॥ ૩૪॥

દૃષ્ટા તત્સુન્દરં રૂપમ્ । તદા ભીતિવિવર્જિતઃ । શાન્તચિત્તઃ પ્રણેમસ્તે । હર્ષગદ્દદનિસ્ટનઃ ॥ ૩૫॥

ૐ તત્સદિતિ શ્રીવાસવિદેવીગીતાયાં બ્રહ્મવિદ્યાયાં યોગશાસ્ત્ર દેવીવિશ્વરૂપ સન્દર્શનયોગોનામ દ્વાદશોઽધ્યાયઃ ।

## ૧૩

ૐ ક્રીં શ્રીં શ્રી વાસવિદેવીગીતા અથ ત્રયોદશોઽધ્યાયઃ ।
દેવીપૂજાવિધિ પ્રબોધયોગઃ કુસુમાર્ય ઉવાચઃ કૃપયા વદ મે સર્વમ્ । તવ પૂજાવિધિં પ્રિયમ્ । પુરુષાર્થં ચ ફલદં કૃતકૃત્યાયતો નરઃ ॥ ૧॥

દેવ્યવાચઃ વક્ષ્મી પૂજાવિધિં વત્વ ! । અમ્બિકાય યથાપ્રિયમ્ ॥ ૨॥

અત્યન્ત શ્રદ્ધયા સાર્થં શ◌ૃણુ વૈશ્યધરાધિપ ! દેવિ નુડિદળુઃ દ્વિવિધિ મમ પૂજાસ્યાત્ ॥ ૩॥

બાહ્યાચાભ્યન્તરાપિ ચ । બાહ્યાપિ દ્વિવિધા પ્રોક્તા । વૈદિકી તાન્ત્રિકી તથા ॥ ૪॥

વૈદિક્કર્ચાપિ દ્વિવિધા । મૂર્તિભેદેન વત્રક ! વૈદિકી વૈદિકૈઃ કાયાઃ । વેદદીક્ષા સમન્વિતૈઃ તત્ર યા વૈદિકી પ્રોક્તા । પ્રથમા તાં વદામ્યહમ્ ॥ ૫॥

યન્ને સાક્ષાત્પરં રૂપમ્ । દૃષ્ટવાનસિ સુકૃતી શાન્તસ્તમાહિત મના । દમ્ભાહઙ્કાર વર્જિતઃ । તત્પરો ભવ તદ્યાજી । તદેવ શરણં વજ ॥ ૬॥

તદેવચેતસા પઠ્ય । જપધ્યાયસ્વ સર્વદા । અનન્યયા પ્રેમયુક્તઃ । ભા મદ્યાવમાશ્રિતઃ ॥ ૭॥

૯૯૯??
ધ્યાનેન કર્મયુક્તન । ભક્તિજ્ઞાનેન વા મનઃ । પ્રાપ્યાહં સર્વથા વત્સ ! ન તુ કેવલ કર્મભિઃ ॥ ૯॥

ઇત્તં વૈદિકપૂજા યઃ પ્રથમયા વિશાંવર । સ્વરૂપયુક્તં સંક્ષેપાત્ । દ્વિતીયા યાં વિધિં બ્રુવે ॥ ૧૦॥

પ્રાતરુત્થાય શિરસિ સંસ્કરેત્પદમુલમ્ । સુપ્રસન્નં સ્મરેત્તત્ર । શ્રીગુરું નિજરૂપિણમ્ । નમસ્કૃત્ય તતો દેવીમ્ । કુણ્ડલીં સંસ્કરેદ્ભુધઃ ॥ ૧૧॥

ધ્યાયેત્તચ્ચિખામધે । સચ્ચિદાનન્દરૂપિણીમ્ । માં ધ્યાયેદથ શૌચાદિ । ક્રિયાસ્પર્વાસ્પમાપયેત્ ॥ ૧૨॥

અગ્નિહોત્રં તતો હુત્વા । મત્તીત્યર્થં દ્વિજોત્તમઃ । હોમાન્તે સ્વાસને સ્થિત્વા । પૂજા સઙ્કુલ્પમાચરેત્ ॥ ૧૩॥

ભૂતશુદ્ધિં પુરા કૃત્વા । માતૃકાન્યાસમેવ ચ । કલ્પયેત્સાત્મનો દેહે । પીઠં ધર્માદિભિઃ પુનઃ ॥ ૧૪॥

જપં સમર્પ્ય શ્રીદેવૈ । તતોऽર્થ્ય સ્થાપનં ભવેત્ । પાત્રાસાધનકં કૃત્વા / પૂજાદ્રવ્યાણિ શોધયેત્ ॥ ૧૫॥

દિગન્ધં ચ પુરા કૃત્વા । ગુરું નત્વા તતઃ પરમ્ । તદનુજ્ઞા સમાદાય । બાહ્યપીઠ તતઃ પરમ્ ॥ ૧૬॥

હૃદિસ્લાં ભાવિતાં મૂર્તિ૦। મમ દિવ્યાં મનોહરામ્ । આવાહયેત્ તતઃ પીઠ । પ્રાણસ્થાપન વિદ્યયા ॥ ૧૭॥

મૂલદેવી પ્રભારૂપા । સર્તવ્યા અઙ્ગદેવતાઃ । તત્પભાપટલ વ્યાપ્તં ત્રૈલોક્યં ચ વિચિન્તયેત્ ॥ ૧૮॥

યન્ત્રસ્ટાના માવૃતીનામ્ । પૂજનં સમ્યગાચરેત્ । આસનાવાહને ચાર્થ્યમ્ । પાદ્યાદ્યાચમનં તથા ॥ ૧૯॥

સ્નાનો વાસોદ્વયં ચૈવ । ભૂષણાનિ ચ સર્વશઃ । ગન્ધં પુષ્પં યથા યોગ્યમ્ । દત્વા દેવૈ સ્વભક્તિતઃ ॥ ૨૦॥

ગઙ્ગાદિભિ સુગન્ધોસ્તુ । તથા પુષ્પઃ સુવાસિતૈઃ । નૈવેદ્યૈ સ્તર્પણૈશૈવ । તામ્બૂલૈર્દક્ષિણાદિભિઃ ॥ ૨૧॥

પુનરાવૃત્તિસહિતમ્ । મૂલદેવીં ચ પૂજયેત્ । પ્રતિવારમશક્તાનામ્ । શુક્રવારો નિયમ્યતે ॥ ૨૨॥

કવચેન ચ સૂળેન । અહં રુદ્રેભિરિતિસુધી । હૃલ્લેખાદિ મહામન્ત્રે । સ્તોષયેન્માં મુહુર્મુહુઃ ॥ ૨૩॥

તોષયેન્માં સુપ્રસિદ્દા નામાં સાહસ્તરેણ ચ । ક્ષમાપયે જગદ્ધાત્રીમ્ । પ્રેમાદ્ર હૃદયો નરઃ ॥ ૨૪॥

પુલકાઙ્કિત સર્વાઙ્ગૈઃ ૧ ભાષ્પરુદ્ધાક્ષિ નિસ્વનઃ । નૃત્યગીતાદિ ઘોષણ । તોષયેન્માં મુહુર્મુહુઃ ॥ ૨૫॥

વેદપારાયશૈવ । પુરાસ્પકલૈરપિ । પ્રતિપાદ્યાયતોષં વૈ । તસ્માસ્તોષયેત્તુ મામ્ ॥ ૨૬॥

નિત્ય હોમં તતઃ કુર્યાદ્ । વૈશ્યાનાંશ્ચ સુવાસિની । વટુકાસ્પામરાનન્યાન્ । દેવી બુદ્ધા તુ પૂજયેત્ । નત્વા પુનસ્ફ્ હૃદયે । વ્યત્યમેણ વિસર્જયેત્ ॥ ૨૭॥

ય એવં પૂજયેદ્દેવીમ્ । શ્રીમદ્વાસવિ કન્યકામ્ । વિમૃશૈતદશેષેણ । અત્યધિકારાનુરૂપતઃ ॥ ૨૮॥

યાવદન્તર પૂજાયા । મધિકારો ભવેન્નહિ । તાવાસ્યાવિમાં પૂજાં શ્રમે જ્ઞાતેતુ તાં ત્યજેત્ ॥ ૨૯॥

અભ્યન્તરા તુ યા પૂજા । સા તુ સંવિલ્લયઃ સ્મૃતઃ । સંવિદેવ પરં રૂપમ્ । ઉપાધિરહિતં મમ ॥ ૩૦॥

ૐ ક્રીં શ્રીં
અન્તસંવિધિ મરૂપે । ચેતસ્રામં નિરાશ્રયમ્ । સંવિરૂપાતિરિક્તં તુ । મિથ્યા માયામયં જગત્ ॥ ૩૧॥

અન્તસંસાર નાશાય । સાક્ષિણીમાત્યરૂપિણીમ્ । ભાવયેન્નિર્મનસ્સેન । યોગયુક્તન ચેતસા ॥ ૩૨॥

ૐ તત્સદિતિ શ્રીવાસવિદેવીગીતાયાં બ્રહ્મવિદ્યાયાં યોગશાસ્ત્ર દેવીપૂજાવિધિ પ્રબોધયોગોનામ ત્રયોદશોऽધ્યાયઃ ।

## ૧૪

શ્રી વાસવીદેવી ગીતા અથ ચતુર્દશોऽધ્યાયઃ ।

પરાશક્તિ સ્થાનવ્રતોત્સવાદિ પ્રકટણાયોગઃ કુસુમાર્ય ઉવાચઃ કતિ સ્થાનાનિ દેવેશિ દ્રષ્ટવ્યાનિ મહીતલે । મુખ્યાનિ ચ પવિત્રાણિ ॥ ૧॥

દેવિ પ્રિયતમાનિ ચ વ્રતાન્યપિ તથા યાનિ । તુષ્ટિદાન્યુત્સવા અપિ । તત્સર્વં વદ મે માતઃ । કૃતકૃત્યો યતો નરઃ ॥ ૨॥

દેવ્યવાચઃ સર્વં દૃશ્યં મમ સ્થાનમ્ । સર્વે કાલાઃ વ્રતાત્મકાઃ । ઉત્સવાસ્તર્વકાલેષુ । યતોષં સર્વરૂપિણી ॥ ૩॥

દેવિયુ નુડિદળુઃ
તથાપિ ભક્ત વાત્સલ્યાત્ । કિઞ્ચિઞ્ચિદથોચ્યતે શ◌ૃણુષ્ટાઽવહિતો ભૂત્વા । વિશવર્યઃ વચો મમ ॥ ૪॥

કોલાપુરં મહાસ્થાનમ્ । યત્ર લક્ષ્મિસ્સદા સ્થિતા । માતુઃ પુરં દ્વિતીયં ચ । રેણુકાધિષ્ઠિતં પરમ્ ॥ ૫॥

તુલજાપુરં તૃતીયં ચ । સ્યાતૃપ્રશ◌ૃઙ્ગં તથૈવ ચ । પિઙ્ગલાયા મહાસ્થાનમ્ । જ્વાલામુખ્યાસ્તથૈવ ચ ॥ ૬॥

શાકામ્બર્યાઃ પરં સ્થાનમ્ । ભ્રામર્યાઃ સ્થાનમુત્તમમ્ । શ્રીરક્તદન્તિકા સ્થાનમ્ । દુર્ગાસ્થાનં તથૈવ ચ ॥ ૭॥

વિન્ધ્યાચલ નિવાસિન્યા । સ્થાનં સર્વોત્તમોત્તમમ્ । અન્નપૂર્ણા મહાસ્થાનમ્ । કાઞ્ચીપુરમનુત્તમમ્ ॥ ૮॥

ભીમાદેવ્યાઃ પરંસ્થાનમ્ । વિમલાસ્થાનમેવ ચ । શ્રીચન્દ્રલા મહાસ્થાનમ્ । કૌશિકી સ્થાનમેવ ચ ॥ ૯॥

નીલામ્બાયાઃ પરંસ્થાનમ્ । નીલપર્વત મસ્તકે । જામ્બૂનદેશ્વરી સ્થાનમ્ । તથા શ્રીનગરં શુભમ્ ॥ ૧૦॥

ગુહ્યકાળ્યા મહાસ્થાનમ્ । નેપાળે યત્પતિષ્ઠિતં મીનાક્ષાઃ પરમં સ્ટાનમ્ । યચ્ચપ્રોક્તં ચિદમ્બરે ॥ ૧૧॥

વેદારણ્યં મહાસ્થાનમ્ । સુન્દર્યા સમધિષ્ટિતમ્ । એકામ્બરં મહાસ્થાનમ્ । પરાશક્ત્યા પ્રતિષ્ઠિતમ્ ॥ ૧૨॥

પરાશક્તિયાદ ભુવનેશ્વરિયિન્દ પ્રતિષ્ઠિતવાગિદે) મહાલસા પરંસ્થાનમ્ । યોગેશ્વર્યાસ્તથૈવચ તથા નીલસરસ્વત્યાઃ । સ્થાનં ચીનેષુ વિશ્રુતમ્ ॥ ૧૩॥

વૈદ્યનાથે તુ બગલા । સ્થાનં સર્વોત્તમં મતમ્ । શ્રીમદ્ભભુવનેશ્વર્યા । મણિદ્વીપં મમ સ્મતમ્ ॥ ૧૪॥

ગાયત્યાશ્ચ પરંસ્થાનમ્ । શ્રીમત્ પુષ્કર મીરિતમ્ । અમરેશે ચણ્ડિકા સ્યાત્ । પ્રભાસે પુષ્કરેક્ષણી ॥ ૧૫॥

નૈમિશે તુ મહાસ્થાને । દેવી સા લિઙ્ગધારિણી । પુરુહૂતા પુષ્કરાક્ષે । આષાઢ ચ રતિસ્તથા ॥ ૧૬॥

ચણ્ડમુણ્ડી મહાસ્તાને । દણ્ડિની પરમેશ્વરી । ભાવભૂત્ ભવેદ્યતિર્ । નાકુલે નકુલેશ્વરી ॥ ૧૭॥

શાઙ્કરી તુ મહાકાળે । શર્વાણી મધ્યમાભિધે । કેદારાબૈ મહાક્ષેતે । દેવી સા માર્ગદાયિની ॥ ૧૮॥

ભૈરવાય્સ્ ભૈરવી સા । ગયાયાં મઙ્ગલા સતા સ્ટાણુપ્રિયા કુરુક્ષેત્ર । સ્વાયમ્ભુવાપિ નાકુલે ॥ ૧૯॥

અવિમુક્ત વિશાલાક્ષિ । મહાભાગા મહાલયે । ગોકર્ણે ભદ્રકર્ણિ સ્યાત્ । ભદ્રા સ્યાદ્દ્રકર્ણિકે ॥ ૨૦॥

શઙ્કુકર્ણે ધ્વનિઃ પ્રોક્તા । સ્કૂલા સ્યાત્ સ્કૂલકેશ્વરી । જ્ઞાનિનાં હૃદયામ્બોજે । હૃલ્લેખા પરમેશ્વરી ॥ ૨૧॥

ઇત્યાદીનિ ચ સ્થાનાનિ । દેવ્યાઃ પ્રિયતમાનિ ચ । તત્તક્ષેતસ્ય માહાત્મમ્ । કૃત્વા પૂર્વ વિશોત્તમાઃ । તદુકેન વિધાનેન । પશ્ચાદ્દેવીં પ્રપૂજયેત્ ॥ ૨૨॥

અથવા સર્વક્ષેત્રાણિ । મહાગિર્યા૦ વિશોત્તમા ! તત્ર નિત્યં વસન્ સર્વ । દિવ્ય ક્ષેત્રા સુષુણ્યદાઃ ॥ ૨૩॥

તાનિ સ્થાનાનિ સમ્પશ્યન્ । જપન્યામેવ સન્તતમ્ । ધ્યાયન્માં ચરણામ્બોજમ્ । મુત્તો ભવતિ બન્ધનાત્ ॥ ૨૪॥

ઇમાનિ ક્ષેત્ર નામાનિ । પ્રાતરુત્તાય યઃ પઠેત્ । ભ ભવન્તિ પાપાનિ । યે તત્ક્ષણાન્ન સંશયઃ ॥ ૨૫॥

અધુના કથયિષ્યામિ । વ્રતાનિ મમ સુવ્રતાઃ । નારીભિશ્ચ નરૈલ્વેવ । કર્તવ્યાનિ પ્રયત્નતઃ ॥ ૨૬॥

શુક્રવારં વ્રતં ચૈવ । મમાતિ પ્રીતિકારકમ્ । નવરાત્રોત્સવં ચૈવ । વ્રતં પ્રીતિકરં મમ ॥ ૨૭॥

સર્વોત્તમં સત્વલદમ્ । વાસવિ કન્યકાવ્રતમ્ । મમાઙ્ગોપાઙ્ગ દેવતા સહિતાર્ચન સદ્વિધિઃ ॥ ૨૮॥

ધ્રુત્તર શતકુણ્ડાઢ્યમ્ । કન્યકા યજ્ઞનામકમ્ । અમોઘં સર્વફલદમ્ । અત્યન્ત ગુહ્યમદ્ભુતમ્ ॥ ૨૯॥

એવમન્યાન્યપિ વિશાઃ । નિત્યનૈમિત્તિકાન્યપિ । વ્રતાનિ કુરુતે યો વૈ । મત્તીત્યર્થં વિમત્સરઃ । પ્રાપ્નોતિ મમ સાયુજ્યમ્ । સ મે ભક્તસ્પમે શ્રિયઃ ॥ ૩૧॥

ઉત્સવાન્નપિ કુર્વિત । ડોલોત્સવ મુખાસુધી । વૈશાખ શુદ્ધ દશમ્યામ્ । કુર્યાડોલોત્સવં મમ ॥ ૩૨॥

૯૯૯??॥ ૩૩॥

કુર્વિત તત્પુણ્યદિને । મમ જનોત્સવં મહત્ । કુઙ્કુમારરુ કર્પૂર । મણિવસ્ત્ર સુગન્ધિતૈઃ સદ્ગન્ધ ધૂપદીપૈત્વ । દમનેન વિશેષતઃ । આન્દોલયેત્તતો વત્સ ! । બાલ વાસવિ કન્યકે ॥ ૩૪॥

મમ પટ્ટાભિષેકસ્ય । મહાદ્ભુતોત્સવં સુધીઃ । અત્યન્ત વૈભવોપેતમ્ । કુર્યાચ્ચાસ્તવિધાનતઃ ॥ ૩૫॥

શયનોત્સવં યદા કુર્યાત્ । તદા જાગરણોત્સવમ્ । રથોત્સવં ચ મે કુર્યાત્ । દમનોત્સવમેવ ચ ॥ ૩૬॥

મદ્ભક્તાદ્વોજયેત્ પ્રીત્યા । તથા ચૈવ સુવાસિની । કુમારીર્વટુકાંશ્ચાપિ । મદ્બુદ્ધા મદ્યતાન્તરઃ । વિત્તશાન રહિતઃ । યજેદેતાન્તુમાદિભિઃ ॥ ૩૭॥

ય એવં કુરુતે ભક્ત્યા પ્રતિવર્ષમતન્દ્રિતઃ । સ ધન્યઃ કૃતકૃત્યોઽસ્ । મત્તીતિ પાત્રવાન્ ભવેત્ ॥ ૩૮॥

સર્વમુક્તં સમાસેન । મમ પ્રીતિદાયકમ્ । નાશિષ્યાય પ્રદાતવ્યમ્ । નાભક્તાય કદાચન ॥ ૩૯॥

ૐ તત્સદિતિ શ્રીવાસવિદેવીગીતાયાં બ્રહ્મવિદ્યાયાં યોગશાસ્ત્ર પરાશક્તિસ્થાન વ્રતોત્સવાદિ પ્રકટણાયોગોનામ ચતુર્દશોઽધ્યાયઃ ।

## ૧૫

શ્રી વાસવિદેવીગીતા અથ પઞ્ચદશોઽધ્યાયઃ ।

શ્રી વાસવિદેવીગીતા મહત્વયોગઃ દેવ્યવાચઃ ન વેદાધ્યયનૈર્યોગૈ । રૈદાનૈસ્તપસેજ્યયા । રૂપં દ્રષ્ટુમિદં શક્યમ્ । કેવલં મત્મપાં વિના ॥ ૧॥

વિશ્વમ્ભરા પુણ્યવતી । ચિલ્લયો યસ્ય ચેતસઃ । બ્રહ્મજ્ઞાનં તુ યત્નષ્ટં ત્વયા પાર્થિવસત્તમઃ ॥ ૨॥

ઇતિ તે કથિતો રાજન્ ! । પ્રસાદાત્ યોગ ઉત્તમઃ । સાઙ્ગોપાઙ્ગ સવિસ્તારો । અનાદિ સિદ્ધો મયા ॥ ૩॥

ઇમં ગોપ્યતમં યોગમ્ । શૃણોતિ શ્રદ્ધયા ચ યઃ । સોઽપિ કૈવલ્યમાપ્નોતિ । યથા યોગી તથૈવ સઃ ॥ ૪॥

ય ઇમં શ્રાવયેદ્યોગમ્ । કૃત્વા સાર્થ૦ સુબુદ્ધિમાન્ । યથા યોગી તથા સોઽપિ । પરં નિર્વાણમૃચ્છતિ ॥ ૫॥

યોગી તાં સમ્યગભ્યસ્ય । જ્ઞાત્વા ચાર્થં ગુરોર્મુખ્યાત્ । કૃત્વા પૂજાં કન્યકાયાઃ । પ્રત્યહં પઠતે તુ યઃ ॥ ૬॥

એકકાલં દ્વિકાલં વા । ત્રિકાલં વાપિ યઃ પઠેત્ । બ્રભૂતસ્ય તસ્યાપિ । દર્શનાન્મુચ્યતે નરઃ ॥ ૭॥

વિદ્યાર્થિનો ભવેદ્વિદ્યા । સુખાર્થિ સુખમાપ્નુયાત્ । કામાનન્યાન્ લભેત્ કામી । મુક્તિમન્તે પ્રયાન્તિ તે ॥ ૮॥

ગીતા રહસ્ય ભૂતેયમ્ । ગોપનીયા પ્રયતૃતઃ । સર્વમુક્તં સમાસેન । યત્નષ્ટં તત્ત્વયાનઘ ! ॥ ૯॥

કથિતં તન્મયા સર્વં નાતો વક્તવ્યમસ્તિ હિ । ઇદં જેષ્ઠાય પુત્રાય । ભક્તિયુક્તાય શીલિને । શિષ્યાય ચ યથોક્તાય । વક્તવ્યં નાન્યથા ક્વચિત્ ॥ ૧૦॥

યસ્ય દેવે પરાભક્તિઃ । યથા દેવે તથા ગુરૂ । તસ્મૃતે કથિતા પ્યાર્થાઃ । પ્રકાશન્તે મહાત્મનઃ । યેનોપદિષ્ટા વિદ્યેયમ્ । સ એવ પરમેશ્વરઃ ॥ ૧૧॥

યસ્યાઽયં સુકૃતં કર્તુ૦। અસમર્થસ્તતો ઋણી । પિત્રોરપ્યધિકઃ પ્રોક્તઃ । બ્રહ્મજન્મપ્રદાયકઃ ॥ ૧૨॥

પિતૃજાતં જન્નનષ્ટમ્ । નેતૃજાતં કદાચન । તસ્યૈ ન દ્રોહત્યાદિ । નિગમો પ્યવદન્નુધીઃ ॥ ૧૩॥

તસ્માત્સર્વ પ્રયત્નન । શ્રીગુરું તોષયેત્સુધીઃ । કાયેન મનસા વાચા । સર્વદા તત્પરો ભવેત્ ॥ ૧૪॥

પુનઃ પ્રાહ તદા દેવી । સન્તુષ્ટા પિતરં તદા । ભવિષ્યત્કાર્યસંસર્ગ । ઈક્ષસ્વ સ્વચક્ષુષા ॥ ૧૫॥

સ દર્શ તતો વહ્નિ । પ્રવેશં વૈશ્ય સન્તતે । વિષ્ણુવર્ધન ભૂપાલમરણં તદનન્તરમ્ ॥ ૧૬॥

કાશીયાત્રં વિરૂપાક્ષ । સ્યાધિપત્ય મહોત્સવમ્ । હસ્તામલકવત્સર્વમ્ । દૃષ્ટા વિસ્મિતમાનસઃ ॥ ૧૭॥

કુસુમ્ભઃ પરમામોદમ્ । જગામ હૃદિ સામ્પ્રતમ્ । દિવ્યં રૂપં સ્વકં ત્યા । તતસ્સા ભુવનેશ્વરી ॥ ૧૮॥

ભૂયોઽપિ વાસવી કન્યા । રૂપેણાસીન્યનોહરા । આવૃતઃ કુસુમશ્રેષ્ઠિ । માયયાભૂત્ યથા પુરા ॥ ૧૯॥

સાલઙ્કાયનોવાચઃ અનેન સદૃશં ગીતા । ન ભૂતં ન ભવિષ્યતિ । સર્વદુઃખપ્રશમનમ્ । સર્વસમ્પત્વવર્ધનમ્ ॥ ૨૦॥

સર્વાપમૃત્યુશમન મકાલમૃત્યુનિવારણમ્ । સર્વજ્જરાર્તિશમનમ્ । દીર્ઘાયુષ્ય પ્રદાયકમ્ ॥ ૨૧॥

પુત્રપ્રદં અપુત્રાણામ્ । પુરુષાર્થ પ્રદાયકમ્ । ઇદં વિશેષા વ્યાસ । સુબોધનં શુભપ્રદમ્ ॥ ૨૨॥

જન્મધ્યે સકૃચ્ચાપિ । ય એ તત્પરતે સુધીઃ । તસ્ય પુણ્યફલં વક્ષે । શ ृણુધ્વં વિશસત્તમ ॥ ૨૩॥

ગઙ્ગાદિ સર્વતીર્થષુ । ય સ્નાયા સ્કોટિ જન્મસુ । કોટિલિઙ્ગ પ્રતિષ્ઠાં ચ । યઃ કુર્યાદવિમુક્તકે" ॥ ૨૪॥

કોટિ સુવર્ણ ભારણામ્ । સ્તોત્રિયેષુ દ્વિજન્મસુ । યઃ કોટિ હયમેધાના । મહરેન્હાઙ્ગ રોદસિ ॥ ૨૫॥

આચરેત્રોપકોટિર્યો । નિર્જલે મરુભૂતલે । દુર્ભિક્ષે યઃ પ્રતિદિનમ્ । કોટિબ્રાહ્મણભોજનમ્ ॥ ૨૬॥

શ્રદ્ધયા પરયા કુર્યાત્ । સહસ્રં પરિવિત્રરાન્ । તપ્પુણ્યં કોટિગુણિતમ્ । ભવેત્પુણ્યમનુત્તમમ્ ॥ ૨૭॥

કન્યકા પરમેશ્વર્યાઃ । ગીતાજ્ઞાનસુકીર્તનાત્ । ભક્તો યઃ કીર્તયેન્નિત્યમ્ । ઇદં કન્યાઃ સુબોધનં તસ્યે શ્રીવાસવિ કન્યા । પ્રીતાભીષ્ટં પ્રયચ્છતિ ॥ ૨૮॥

યઃ પઠેતન્યકાયાસ્ય । સુગીતાં ભક્તિસંયુતઃ । લક્ષ્મીશ્ચાગ્ચલ્ય રહિતા । સદા તિષ્ઠતિ તદ્ગહે ॥ ૨૯॥

અત્યન્ત શ્રદ્ધયા નિત્યમ્ । સુગીતા યઃ પઠેન્નરઃ । ભારતી તસ્ય જિહ્વાગ્રે । રઙ્ગે નૃત્ય નિત્યશઃ ॥ ૩૦॥

યસ્તુ શ્રી વાસવિ કન્યા । સુગીતા શ્રવણાસ્તથા । પઠનાત્પાઠનાદેવીમ્ । અનુનિત્યં સમર્ચયેત્ ॥ ૩૧॥

સર્વાન્ કામાનવાપૈહ । સર્વસૌભાગ્ય સંયુતઃ । પુત્રપૌત્રાદિ સંયુક્તો । ભુક્તા ભોગાન્યથેતાન્ ॥ ૩૨॥

અન્તે શ્રી વાસવી દેવ્યા । સાયુજ્યમતિ દુર્લભમ્ । પ્રાર્થનીયં બ્રહ્માદૈત્વ । પ્રાષ્ટોત્યેવ ન સંશયઃ ॥ ૩૩॥

નિષ્કામઃ કીર્તયેદ્યસ્તુ । શ્રીવાસવીં ગીતા મહત્ બ્રહ્મજ્ઞાનમવાસ્કોતિ । યેન મુચ્યત બન્ધનાત્ ॥ ૩૪॥

ધનાર્થિ ધનમાજ્યોતિ । યશોઽર્થિ ચાપ્નુયાદ્યશઃ । વિદ્યાર્થિ ચાપ્નુયાદ્વિદ્યામ્ । સુગીતા પઠનાદ્ભુતમ્ ॥ ૩૫॥

નાન્હેન સદૃશં ગ્રન્થમ્ । ભોગમોક્ષપ્રદં પ્રજાઃ । કીર્તનીયમિદં તસ્માત્ । યોગમોક્ષાર્થિભિર્નરૈઃ ॥ ૩૬॥

ચતુરાશ્રમ નિષ્ટે । કીર્તનીયમિદં સદા । સ્વધર્મસમનુષ્ટાન । વૈકલ્ય પરિષર્તયે ॥ ૩૭॥

કલ્ પાપૈક બહુળે । ધર્માનુષ્ઠાન વર્જિતે વાસવી ગીતામુક્કા નૃણાં નાન્યક્ષરાયણમ્ ॥ ૩૮॥

યો ભઝી વાસવી દેવ્યાઃ । સનિત્યં કીર્તયેદિદમ્ । નાન્યથા પ્રીયતે દેવી । કલ્પકોટિ શતૈરપિ ॥ ૩૯॥

પરાશક્તિ તત્ત્વ "આત્માવા ઇદમગ્ર આસીત્" "સદેવ સૌમૈદમગ્ર આસીત્" "એકમેવાદ્વિતીયં બ્રહ્મ"
ૐ તત્સદિતિ શ્રીવાસવિદેવીગીતાયાં બ્રહ્મવિદ્યાયાં યોગશાસ્તે શ્રી વાસવિદેવીગીતા મહત્વયોગો નામ પઞ્ચદશોઽધ્યાયઃ ।

ઇતિ શ્રીમતિરાજેશ્વરી ગોવિન્દરાજવિરચિતા શ્રીવાસવિદેવીગીતા સમાપ્તા ॥

## શ્રી વાસવિદેવ્યષ્ટકમ્ ।

અખણ્ડવિશ્વનાયિકાં તમોપહાં શ્રીકન્યકાં અનન્તમહિમસમ્પદાં અભીષ્ટસિદ્દિદાં સુધાં અપૂર્વચારિત્રાન્વિતાં અતીન્દ્રિયાત્મસુખપ્રદાં અભૂતપૂર્વધીયુતાં ભજામ્યહં અહર્નિશમ્ ॥ ૧॥

અનન્તજીવકોટિસૃષ્ટિસ્થિતિવિલય વિહારિણીં અનાદનન્તરૂપિણીં સનાતનીં મનોન્મનીં અપારપ્રેમવારિધીં અસીમજ્ઞાનસુખનિધીં અધીરતાશુદૂરિણીં ભજામ્યહં અહર્નિશમ્ ॥ ૨॥

સુપુત્રકામેષ્ટિયાગસુફલરૂપયોગિનિં સમસ્તલોકપાવકારુણાબ્બપદવિરાજિનીં સ્વધર્મશીલરક્ષણાર્થમાત્તત્યાગસુવ્રતાં સુભાષિણીં સુહાસિનીં ભજામ્યહં અહર્નિશમ્ ॥ ૩॥

વિરૂપાક્ષસોદરીં વિવેકજ્ઞાનધારિણીં વિરાગપૂર્ણમાનિનીં વિરાટ રૂપધારિણીં વિરિઞ્ચિવિષ્ણુશિવનુતાં સુપૂજિતાં પ્રમોદિતાં વિશાલનેત્રરાજિતાં ભજામ્યહં અહર્નિશમ્ ॥ ૪॥

સમાધિદત્તવચનપાલનાર્થજન્મધારિણીં નૃપાલકુસુમશ્રેષ્ટિમુક્તિદાયિનીં નિરઞ્જનીં કૃપાવિશેષમોદિનિકુસુમામ્બ કીર્તિવર્ધિનીં સુમૂર્તશીલરૂપિણીં ભજામ્યહં અહર્નિશમ્ ॥ ૫॥

ત્રિતાપવદગ્ધભક્તહૃદયખેદહારિણીં ત્રિશક્તિરૂપધારિણીં વરાભયકરરઞ્જનીં ત્રિકાલજ્ઞાનિગુરુવરેણ્યભાસ્કરાર્ચિતાં શુભાં ત્રિલોકપાવનીં સદા ભજામ્યહં અહર્નિશમ્ ॥ ૬॥

ચરાચરાન્તર્વ્યાપિનીં સુરાસુરાન્તર્સાક્ષિણીં પરમ્પરાગતાપદાપહારિણીં સુવાસિનીં યશોદયાં સુખોદયાં પ્રભોદયાં મહાભયાં દયાલયાં ગુણાલયાં ભજામ્યહં અહર્નિશમ્ ॥ ૭॥

સદાશુભાવદિવ્યયાનહર્ષિણીં સદ્બુર્ષિણીં સદાનુગ્રહકરામૃતાભિલહરિ મોદદાયિનીં દિનેન્દ્રકોટિસમપ્રભાં અઘાપહાં મદાપહાં સુગીતસુધામોદિનીં ભજામ્યહં અહર્નિશમ્ ॥ ૮॥

ઇતિ શ્રીમતિરાજેશ્વરી ગોવિન્દરાજવિરચિતં શ્રીવાસવિદેવ્યષ્ટકં સમ્પૂર્ણમ્ ॥

*Shri Vasavidevi Gita*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*